SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# अभिज्ञानशाकुन्तलनाटके भौगोलिकभावना

**Biswajit Mandal**
State Aided College Teacher-I, Dept. of Sanskrit,
Vivekananda Mission Mahavidyalaya,
Chaitanyapur, Haldia, West Bengal, India
Email: biswajit.snsk@gmail.com

**Abstract:** महाकविकालिदासविरचितस्याभिज्ञानशाकुन्तलनाटकस्य मूलवृत्तान्तं महाभारतात् संगृहीतम्। तु महाभारतात् संगृहीतं सारभूतवृत्तान्तं सार्थकनाट्यरूपप्रदानार्थमभिनववृत्तान्तानां संयोजनं महाकविनात्र कृतम्। एवमभिनववृत्तान्तसंयोजनकाले महाकविकालिदासस्य विविधाः भावनाः दृश्यकाव्येऽस्मिन् प्रकाशिताः भवन्ति। तत्र दृश्यकाव्ये प्रकाशिताः भौगोलिकभावनाः शोधप्रवन्धेऽस्मिन्नालोचिताः भवन्ति। गोधूलिसमय-विद्युत्प्रभा-भूमिरूप-महानदी-मेघमाला-दिनरात्रिसंघटनवृत्तान्त-वायुमण्डल-इत्यादयोऽस्य प्रवन्धस्य प्रधानालोच्यविषयाः।

**Keywords:** गोधूलिकालम्, विद्युत्, उपकूलभागः, महानदी, मेघाः, वायुमण्डलम्, भूमिरूपः।

विविधज्ञाननिष्णातः महाकविकालिदासः संस्कृतसाहित्यस्य श्रेष्ठः कविः। तस्य लेखनीप्रसूताः वहवः ग्रन्थाः सन्ति। ग्रन्थेषु 'अभिज्ञानशाकुन्तलम्' सर्वश्रेष्ठम्। तदुक्तञ्च– "कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्" इति। न केवलमिदम्, समग्रसंस्कृतसाहित्येऽप्यस्य काव्यस्य श्रेष्ठत्वमस्ति। एतद्विषयकं प्रवादमेकम्– "काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला"। महाकवेः कविप्रतिभायाः सामग्रिकप्रतिफलनमत्र परिलक्षितम्। वस्तुतः महाभारताश्रितं सप्ताङ्कविशिष्टं शृङ्गाररसात्मकमिदं दृश्यकाव्यं ज्ञाननिधिस्वरूपम्, विविधप्रकारकं ज्ञानमत्र निवद्धमस्ति। दृश्यकाव्येऽस्मिन् महाकविना प्रकाशिता भौगोलिकभावना मयात्रालोचिता।

**गोधूलिकालवर्णनम्–**

वयं जानिमः 'अभिज्ञानशाकुन्तलम्' ग्रीष्मसमयेऽभिनितमिति। अस्य दृश्यकाव्यस्य प्रथमाङ्के प्रस्तावनांशे सूत्रधारवचनानुसारेण नटी ग्रष्मसमयमधिकृत्य गीतमिदं गायति–

"सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥"[1]

अनेन गीतेन नटी ग्रीष्मसमयस्य वर्णनं करोत। ग्रीष्मकाले दिवसान्तिमभागो गोधूलिसमयो वा रमणीयो भवति। अस्य गोधूलिकालस्य रमणीयताविधाने भौगोलिकव्याख्यास्ति। दिनान्ते सूर्यः दिगन्तमतिक्रम्यास्ताचले गमनेऽपि सहसा रजनी न समागच्छति । सुर्यः दिगन्तरेखात् १८° निम्ने गमने रजनी समागच्छति। दिगन्तमतिक्रम्य सूर्यः यावत् १८° परिमाणं स्थानं नातिक्रमति तावत् सूर्यकिरणेन वायुमण्डलमुद्भासितं भवति। एवमुद्भासितं वायुमण्डलमेव गोधूलिस्वरूपम्। आत्मकक्षोपरि कौणिकावस्थानवशात् ग्रीष्मकाले दिगन्तरेखात् १८° परिमाणं स्थानमतिक्रमने सूर्यस्याधिकसमयस्य प्रयोजनं भवति। शिशिरे तु वैपरित्यं परिलक्ष्यते। ग्रीष्मकाले दिवसाः परिणामरमणीयाः भवन्ति गोधूलिकालस्य दीर्घस्थायीत्वात्।

**प्रभातरलस्य ज्योतिषः सम्भवः–**

दृश्यकाव्यस्यास्य प्रथमाङ्के राजा दुष्यन्तः महर्षिकण्वस्य पालितकन्यायाः शकुन्तलायाः रूपलावण्यं प्रेक्ष्य कथयति—

"मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥"[2]

श्लोकेऽस्मिन् विद्युत्प्रभोत्पत्तिविषयकं तथ्यं महाकविना परिवेशितम्। विद्युत् कदापि भूगर्भात् न सम्भवति। प्रभातरलं विद्युत् सर्वदाकाशे सञ्जायते। आकाशे मेघे सञ्चारे प्रभातरलं विद्युत् समुद्भवति। भौगोलिकव्याख्यानुसारेण मेघमालाः जलकणानां तथा वरफकणानां समष्टिभूताः। तत्रोभयप्रकारकणाः पारस्परिकघर्षणवशादायनिताः भवन्ति। आयनिताः कणाः विद्युत्प्रभासृष्टेः मूलम्।

**उपकूलभागस्य जलवायोः तथा भूमिरूपस्य वर्णनम् –**

तृतीयाङ्के यज्ञविघ्ननिरशनादनन्तरं विश्रामग्रहणार्थं राजा तापसैरादिष्टः। तु शकुन्तलादर्शनं विना राज्ञः विश्रामग्रहणं केनोपायेन सम्भवति? न सम्भवतीत्यर्थः। तर्हि शकुन्तलामण्विष्यन् राजा दुष्यन्तः मालिनीनदीतटस्थितं लताकुञ्जं निकषा गच्छति। तत्र मालिनीं निकषागम्य मालिनीतटस्य मनोरमजलवायुना स मुग्धोऽभवत्। तदुक्तञ्च–

"शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः॥"[3]

वस्तुतः भौगोलिकावस्थानहेतोः जलभागसन्निकटवर्तीजलवायुः मनोरमो भवति। उपकूलभागस्य तापमात्रानियन्त्रने जलभागस्य गुरुत्वपूर्णा भूमिकास्ति। जलभागः धीरभावेनोष्णतापरिवर्तनं करोति। अतः सहसोष्णं न भवति, न वा शीतलम्। ततः जलभागस्य प्रभाववशात् तटभागे ग्रीष्मकालेऽधिकोष्णता न विराजते, शिशिरे च नाधिकशीतलता। अयं मनोरमजलवायुः सर्वदोपभोग्यो भवति।

पुनश्च जलतरङ्गस्य सञ्चयकार्येण नद्याः तटे वालुकणादीनां सञ्चयं भवति, विविधप्रकारभूमिरूपादेः सृष्टिर्भवति। अत्र नदीजलतरङ्गस्य सञ्चयकार्येण मालिनीनदीतटे वेतसकुञ्जस्य सम्मुखभागे पाण्डुवर्णविशिष्टानां सिकतानां सञ्चयं भवति। तस्मिन् पाण्डुसिकते सद्यःकृता पदचिह्नावली दृश्यते। तदुक्तञ्च–

"अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥"[4]

जलतरङ्गेन नदीतटे सर्वदा सञ्चयकार्यं भवतीति न, कदापि क्षयकार्यमपि भवति। तरङ्गाघातेन नदीतटं क्षयप्राप्तं भवति, कदापि वा नदीतटं सम्पूर्णरूपेण क्षयप्राप्तं भवति। तटहीना नदी निर्मलजलं कलुषितं करोति, उपकूलवर्तीस्थानं प्लावितं करोति। पुनश्च तटभागस्य ह्रासवशात् तटस्थिताः वृक्षादयोऽपि नदीगर्भे विलीनाः भवन्ति। अस्य नाटकस्य पञ्चमाङ्के धारणेयं कविनोपस्थापितोपमारूपेण तत्र श्लोकः–

"व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम्।
कुलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च॥"[5]

**महानदी–**

अस्य नाटकस्य तृतीयाङ्के प्रियंवदायाः वचनमस्ति–

"सागरमुज्झित्वा कुत्र वा महानद्यवतरति।"[6] इति।

अत्र शकुन्तला महानदीस्वरूपा , दुष्यन्तश्च सागरस्वरूपः। अत्र 'महानदी'शव्दस्यार्थद्वयं स्थातुमर्हति– महती नदी, महानदी नामका नदी विशेषा वा। द्विविधप्रकारकमर्थमत्र प्रयोज्यम्। यदि महानदी'इत्यस्यार्थो भवति 'महती नदी' तर्हि वयं जानिमः -शाखानदी महानद्या सह, महानदी च सागरेण सह सम्मिलिता भवति। पुनश्च यद्यत्र 'महानदी'इत्यस्यार्थो भवति महानदी नामका नदी विशेषा, तदनुसारेणापि छत्तिशगडराज्यस्थितात् सिहाओयानामकात् पर्वतादुत्पन्ना महानदी वङ्गोपसागरेण सह सम्मिलिता भवति।

**मेघविषयकधारणा –**

विविधप्रकारमेघविषये कालिदासस्य धारणा मयात्र परिलक्षिता। नाटकस्यास्य पञ्चमाङ्के शार्ङ्गरवस्यैकोक्तिः खलु–

"भवन्ति नम्रास्तरवः फलागमैर्नवाम्वुभिर्दूरविलम्विनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥"[7]

कालिदासस्य पर्यवेक्षणानुसारेण नवाम्वुभिः घनाः दुदूरावनताः भवन्ति। भौगोलिकव्याख्यानुसारेणाकारानुसारेणोच्चतानुसारेण च मेघाः विविधप्रकाराः भवन्ति। उच्चतानुसारेण मेघाः त्रिविधाः भवन्ति। ते यथा–

(क) अधिकोच्चतास्थितमेघाः (८००० मि. तः १२००० मि. पर्यन्तमुच्चतायां तिष्ठन्ति)
(ख) मध्यमोच्चतास्थितमेघाः (२००० मि. तः ७००० मि. पर्यन्तमुच्चतायां तिष्ठन्ति)
(ग) निम्नोच्चतास्थितमेघाः (भूपृष्ठात् २००० मि. पर्यन्तमुच्चतायां तिष्ठन्ति)

आकारानुसारेण च मेघाः चतुर्विधाः भवन्ति । ते यथा–

(क) सिरासमेघाः
(ख) किउमुलासमेघाः
(ग) स्ट्रयाटासमेघाः
(घ) निम्वासमेघाः

एतेषु निम्वासमेघाः जलपूर्णाः, वज्रगर्भाः, दूरविलम्विनः तथा वारिवर्षणस्य कारणस्वरूपाः भवन्ति। एतादृशां घनानामुल्लेखः कालिदासेनात्र कृतः। निम्वोस्ट्र्याटास-किउमुलोनिम्वास-इत्यादयः मेघाः निम्वासपर्यायभुक्ताः।

**दिनरात्रिसंघटनवृत्तान्तम्—**

स्वर्गे दुर्जयनामकः दानवसंघोऽस्ति। स दानवसंघः देवराजस्येन्द्रस्याजय्यः। राजा दुष्यन्तः तेषां दानवानां हन्ता भवितुमर्हति। ततः दानवसंहारार्थं राजा दुष्यन्तः देवराजेनामन्त्रितः। तु यः दानवसंघः देवराजेनापराजेयः स कथं मया हनिष्यतयिति शङ्काप्रकाशे कृते सारथिः मातलिः दुष्यन्तस्य शङ्कामुच्छेतुमाह–

"सख्युस्ते स किल शतक्रतोरजय्यस्तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तरश्मिस्तन्नैशं तिमिरमपाकरोति चन्द्रः॥"[8]

अतः सप्तरश्मिः सूर्यः यन्नैशं तिमिरं दुरीकर्तुं न शक्नोति, तन्नैशं सूर्यापेक्षयाल्पतेजविशिष्टश्चन्द्रः ध्वंसयति सौरजागतिकनियमवशात्। वस्तुतः पृथिव्याः अह्निकगतिः दिनरात्रिसंघटनस्य कारणस्वरूपा। पृथिवी सर्वदात्मकक्षोपर्यावर्तिता भवति। आवर्तनकाले पृथिव्याः यत् पृष्ठं सूर्यमभितः तिष्ठति तत्पृष्ठं

सूर्यालोकेनालोकितं भवति, तदा तत्र दिनं विराजते। अपरपृष्ठे सूर्यालोकस्याभावात् रात्रिमन्धकारं वा विराजते। सूर्यालोकाभावात् यत्रान्धकारं विराजते तत्र सूर्यालोकेनान्धकारनाशं केनोपायेन सम्भवति? न सम्भवतीत्यर्थः। तदन्धकारं चन्द्रालोकेन दुरीकरणं सम्भवम्। वस्तुतः चन्द्रस्य निजस्वमालोकं नास्ति, सूर्यालोकेन चन्द्रः आलोकितः भवति। चन्द्रेन प्रतिफलितेन सूर्यालोकेन रात्रिकालीनमन्धकारं दुरीभूतं भवतीत्यर्थः।

**वायुमण्डलविषयकपर्यालोचनम् –**

अस्य नाटकस्य सप्तमाङ्के स्वर्गादिन्द्ररथेन प्रत्यावर्तनकाले जलकणापूर्णं रथचक्रप्रान्तभागम्, चातकपक्षिविशेषाणां निर्गमनं तथा विद्युत्प्रभाराञ्जितं रथाश्वयुगलं दृष्ट्वा राजा दुष्यन्तः घनानामुपरि पृथिवीसंलग्नवायुस्तरे वा रथस्य गमनमनुमीयते। यतः जलकणा-मेघ-चातकपक्षिणः पृथिवीसंलग्नवायुस्तरयेव तिष्ठन्ति। तदुक्तञ्च राज्ञा दुष्यन्तेन–

"अयमरविवरेभ्यश्चातकैर्निष्पतद्भिर्हरिभिरचिरभासां तेजसा चानुलिप्तैः।
गतमुपरि घनानां वारिगर्भोदराणां पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥"[9]

अतः शीघ्रं ते मेघमार्गात् पृथिव्यामवतरन्तीत्यर्थः।

वस्तुतः धरणी वायुमण्डलेनावृतास्ति। इदं वायुमण्डलं विविधस्तरविशिष्टम्। पृथिव्याः वायुमण्डले पञ्च स्तराणि सन्ति। तानि यथा– घनमण्डलम् (Troposphere), शान्तमण्डलम् (Stratosphere), मध्यमण्डलम् (Mesosphere), तापमण्डलम् (Thermosphere), वहिःमण्डलम् (Exosphere) च।

(क) *घनमण्डलम् (Troposphere)*– इदं वायुमण्डलस्य सर्वनिम्नस्तरम्। अतः पृथिवीपृष्ठसंलग्नस्थितं स्तरमिदम्। अस्मिन् स्तरे जलकणा-विद्युत्-पक्षि-इत्यादयः तिष्ठन्ति। अस्मिन्नेव सरे प्राकृतिकविपर्ययादेः संघटनं भवति। ततः मण्डलमिदं क्षुब्धमण्डलरूपेणापि प्रसिद्धम्। स्तरमिदं भूपृष्ठात् १० कि.मि. पर्यन्तं विस्तृतम्।

(ख) *शान्तमण्डलम् (Stratosphere)*– घनमण्डलस्योपरि ५० कि.मि. पर्यन्तं विस्तृतमिदं स्तरम्। अस्मिन् स्तरे मेघ-जलकणा-इत्यादयः न तिष्ठन्ति, अत्र प्राकृतिकदुर्योगोऽपि न परिलक्षितः। इदं स्तरमतीव शान्तम्। ततः मण्डलमिदं शान्तमण्डलरूपेणापि प्रसिद्धम्। शान्तस्वभावविशिष्टेऽस्मिन्नेव मण्डले वायुयानादेः गमनागमनं भवति।

(ग) *मध्यमण्डलम् (Mesosphere)*– शान्तमण्डलस्योपरि ८० कि.मि. पर्यन्तं विस्तृतमिदं स्तरम्। वायुमण्डलस्य शीतलतमस्तरमिदम्। महाशून्यात् समागताः उल्कादयोऽनेन मण्डलेन ध्वंसप्राप्ताः भवन्ति।

(घ) *तापमण्डलम् (Thermosphere)*– मध्यमण्डलस्योपरि ७०० कि.मि. पर्यन्तं विस्तृतमिदं स्तरम्। अनेन मण्डलेन वेतारतरङ्गाः प्रतिफलिताः भवन्ति।

(ङ) *वहिःमण्डलम् (Exosphere)*– वायुमण्डलस्य सर्वशेषस्तरमिदम्। तापमण्डलस्योपरि १०००० कि.मि. पर्यन्तं विस्तृतमिदं स्तरम्। कृत्रिमोपग्रहादयोऽस्मिन्नेव स्तरे तिष्ठन्ति।

अत्र रथस्थितः राजा दुष्यन्तः वायुमण्डलस्य सर्वनिम्नस्तरस्य वैशिष्ट्यानि दृष्ट्वानुमीयते यत्ते पृथिवीपृष्ठं निकषा तिष्ठन्ति।

वस्तुतः विविधविषयाः परस्परसम्वन्धयुक्ताः। अधुनाधुनिकपाठ्यक्रमेऽपीयं वहुविषयकभावना

(Multidisciplinary thinking) प्रतिफलिता। काव्यशास्त्रेषु केवलं काव्यिकभावनास्ति, दर्शनशास्त्रेषु केवलं दार्शनिकभावनास्तीति न। एकस्मिन्नेव शास्त्रे विविधविषयं शास्त्रकारेणोपस्थापितम्। अस्माभिः तदन्वेषणं कर्तव्यमिति।

## Endnotes

1. अभिज्ञानशाकुन्तलम्/प्रथमाङ्कः/श्लोकः-३
2. अभिज्ञानशाकुन्तलम्/प्रथमाङ्कः/श्लोकः-२३
3. अभिज्ञानशाकुन्तलम्/तृतीयाङ्कः/श्लोकः-५
4. अभिज्ञानशाकुन्तलम्/तृतीयाङ्कः/श्लोकः-६
5. अभिज्ञानशाकुन्तलम्/पञ्चमाङ्कः/श्लोकः- २१
6. अभिज्ञानशाकुन्तलम्/तृतीयाङ्कः/दशमश्लोकस्य परस्थितः गद्यांशः
7. अभिज्ञानशाकुन्तलम्/पञ्चमाङ्कः/श्लोकः-१२
8. अभिज्ञानशाकुन्तलम्/षष्ठाङ्कः/श्लोकः-३०
9. अभिज्ञानशाकुन्तलम्/सप्तमाङ्कः/श्लोकः-७

## Bibliography


- कालिदासः - अभिज्ञानशकुन्तलम् – सम्पा. अनिल वसु, संस्कृत वुक डिपो, कोलकाता-७००००६, चतुर्थसंस्करणम्,२००३.
- कालिदासः – अभिज्ञानशकुन्तलम् – सम्पा. सत्यनारायण चक्रवर्त्ती, संस्कृत पुस्तक भाण्डार, ३८, विधान सरणी, कोलकाता – ७०० ००६, तृतीयसंस्करणम् ।
- আধুনিক ভূগোল ও পরিবেশ (দশম শ্রেণী) – ড. যুধিষ্ঠির হাজরা ও অনিরুদ্ধ হাজরা, (বুক ইণ্ডিয়া) অ্যাকাডেমিক পাবলিকেশান, ৬৫/২-কলেজ স্ট্রিট-কলকাতা-৭০০০৭৩, পরিমার্জিত নতুন সংস্করণ, জানুয়ারী ২০২৪ .
- মাধ্যমিক ভূগোল অল্টারনেটিভ (দশম শ্রেণী), শুভঙ্কর পাল, টপার গাইড পাবলিশার্স, Fourth Edition 2025-2026 .


——